श्रीभगवानुवाच

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ॥ १४.१॥

॥ ॐ ॥ 'बुद्धिर्योगे त्विमां शृण्विति' (२.३९) द्वितीये प्रतिज्ञाय आषष्ठसमाप्तेः कामादिवर्जनादीतिकर्तव्यतासहितं कर्म ध्यानलक्षणं ज्ञानसाधनमुक्तम् । तत्रेतिकर्तव्यतांशं उत्तराध्यायपञ्चकेन प्रपञ्चयतीति प्रघट्टार्थः । तत्र बन्धप्रकारे ज्ञाते सत्येव तन्मोचनसाधनस्य तदितिकर्तव्यस्य चानुष्ठानाय तत्प्रपञ्चनं युज्यते । बन्धश्च "कारणं गुणसङ्गोऽस्य" (१३.२६) इत्यादिना पूर्वाध्यायोक्तक्षेत्रक्षेत्रसंयोगहेतुकप्राणिजननविवरणपूर्वकं त्रिगुणविकारस्थितिं तदत्ययोपायं च दर्शयत्यस्मिन्नध्याये । 'कार्यते ह्यवशः कर्म' (३.५) इति तृतीयाध्याये सङ्क्षेपेण त्रैगुण्यस्योक्तत्वेऽपीह तस्य विविच्य कीर्तनमिति ज्ञेयम् । श्रोतुरादरजननाय वक्ष्यमाणमर्थं प्रतिज्ञाय स्तौति ॥ परमिति द्वयेन । परमन्यद्भूयः (???) पुनः प्रवक्ष्यामि । तत्किमित्यत उक्तम् ॥ ज्ञानानामिति । कर्मणि ल्युट् । ज्ञातव्यानां मध्ये उत्तमं ज्ञानं ज्ञातव्यम् । यज्ज्ञात्वा मुनयो मननशीलाः सर्वे इतः संसारात्परां सिद्धिं मोक्षं गताः प्राप्ताः ॥ १४.१॥

इदं ज्ञानमपाश्रित्य मम साधर्म्यमागताः ।
सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च ॥ १४.२॥

इदं ज्ञानं वक्ष्यमाणार्थज्ञानमुपाश्रित्य संपाद्य मम साधर्म्यं सारूप्यं आगताः प्राप्ताः । शिष्टं व्यक्तम् ॥ १४.२॥

मम योनिर्महद् ब्रह्म तस्मिन्गर्भं दधाम्यहम् ।
संभवः सर्वभूतानां ततो भवति भारत ॥ १४.३॥

प्रतिज्ञातार्थमाह ॥ ममेति । मगद्ब्रह्म महती चित्प्रकृतिः मम योनिः भार्या तस्मिन्ब्रह्मणि चित्प्रकृतौ गर्भं दधामि । चतुर्विंशतितत्त्वांशयुतान् जीवान्स्वोदरस्थान् रेतोरूपेण निर्वास्य चित्प्रकृत्युदरे निक्षिपामीत्यर्थः । ततस्तत्र निक्षेपाद्भूतानां प्राणिनां देहयोगरूपसंभवो जन्म भवति । 'ॐ ज्ञोऽत एव ॐ' (२.३.१८) 'ॐ युक्तेश्च ॐ' (२.३.१९) इति सूत्रकृदुक्तेः ॥ १४.३ ॥

सर्वयोनिषु कौन्तेय मूर्तयः संभवन्ति याः ।
तासां ब्रह्म महद्योनिरहं बीजप्रदः पिता ॥ १४.४ ॥

न केवलमादिसर्ग एवानयोः कारणत्वं किंतु सर्वदेत्याह ॥ सर्वेति । देवमनुष्यतिर्यगादियोनिषु याः मूर्तयः कार्यव्यक्तयः संभवंति । तासां मगद्ब्रह्म महालक्ष्मीः योनिः क्षेत्ररूपं कारणम् । अहं बीजप्रदः गर्भाधानकर्ता पिता ॥ १४.४ ॥

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥ १४.५ ॥

एवं 'सत्त्वं रजस्तम इति' यावत्संजायत' (१३.२३) इत्युक्तं श्लोकद्वयेन विवृत्येदानीं यो हि बद्धोऽस्मीति जानाति स एव तन्निवृत्तिसाधनं विजिज्ञास्य ज्ञात्वाऽनुतिष्ठति । अतो बन्धोच्छेदसाधना(य)नुष्ठानाय तत्साधनज्ञापनार्थं जिज्ञासामुत्पादयितुं गुणत्रयकृतबन्धप्रकारं तावदाह ॥ सत्त्वमिति । प्रकृतिसंभवाः त्रिगुणात्मकजडप्रकृतितः संभवंतस्तदंशभूताः सत्त्वं रजस्तम इति गुणाः तथा प्रकृतिसंभवाः चित्प्रकृतितः सृष्टिकाले विभज्यमानाः सद्गुणत्वसृष्ट्यादिरञ्जनकर्तृत्वजीवग्लपनहेतुत्वनिमित्तैः क्रमात्सत्त्वरजस्तमश्शब्दिताः श्रीभूदुर्गाख्यागुणाः क्रमाद्गुणत्रयाभिमानिन्यः तिस्रो देव्यश्च देहे स्थितमव्ययं स्वरूपतो व्ययहीनं जीवम् । जात्येकवचनम् । जीवजातं निबध्नंति । सर्वासां सर्वजीवबन्धकत्वेऽपि सत्त्वमानिनी श्रीः देवबन्दिका रजोऽभिमानिनी भूर्मनुष्यबन्धिका तमोऽभिमानिनी दुर्गा दैत्यबन्धिकेति विशेषो ज्ञेयः । अत्र देह इत्युक्तिर्भूतपूर्वगत्या मुक्तानामपि देहित्वात्तद्व्यावृत्त्यर्था ॥ १४.५ ॥

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ॥ १४.६ ॥

श्रीभूर्दुर्गाभिः क्रियमाणं देवादित्रितयविषयबन्धनप्रकारं विविच्याह ॥ तत्रेत्यादित्रयेण । तत्र तेषु गुणेषु तासु देवीषु च सत्त्वं सत्त्वाभिमानिश्रीतत्त्वं निर्मलत्वात् अनामयं न विद्यते आमयो व्याध्याद्युपद्रवो यस्मात्तत् तच्च प्रकाशकं तत्त्वज्ञानोत्पादकं सत् सुखसङ्गेन तत्त्वज्ञानसङ्गेन च देवान्बध्नाति ॥ १४.६ ॥

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ॥ १४.७ ॥

तृष्णा नाम इदं मे भूयादित्याशा । सङ्गो वस्तुष्वासक्तिः । तयोः समुद्भवो यस्मात्तत् । रजोभिमानिनी भूदेवी भूतत्त्वं च रागात्मकं सृष्ट्यादिरञ्जनस्वरूपं विद्धि । तद्द्विविधं रजः । कर्मयोगेन देहिनं मानुषं जीवं बध्नाति ॥ १४.७ ॥

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ॥ १४.८ ॥

अज्ञानं जायते यतस्तदज्ञानजं तमस्तमोऽभिमानिनी दुर्गा, तत्त्वं च, सर्वदेहिनां मोहनं मिथ्याज्ञानजनकं विद्धि । तद्द्विरूपं तमःप्रमादादिभिर्दैत्यजनं निबध्नाति ॥ १४.८ ॥

सत्त्वं सुखे सञ्जयति रजः कर्मणि भारत ।
ज्ञानमावृत्य तु तमः प्रमादे सञ्जयत्युत ॥ १४.९ ॥

सत्त्वादीनां सुखादिसंपादनेनैव बन्धकत्वमिति नियमं दृढयति (???) ॥ सत्त्वमिति । सत्त्वं सत्त्वाभिमानिनी श्रीश्च सुखे सुखविषये सञ्जयति । प्रवर्तयतीत्यर्थः । रजः रजोऽभिमानिनी भूदेवी च कर्मविषये सञ्जयति । तमस्तु तमोऽभिमानिनी दुर्गा च ज्ञानमावृत्य मनसस्तत्त्वज्ञानशक्तिं प्रतिबध्य प्रमादे अधर्मे अधर्मबुद्ध्यादिरूपे सञ्जयति । उत शब्दादालस्यादिग्रहः ॥ १४.९ ॥

रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥ १४.१० ॥

ननु त्रयाणां सर्वबन्धकत्वसाम्यात्कथं कस्यचिदेव गुणस्य कार्यं दृश्यते इत्यतः उत्कटत्वानुत्कटत्वाभ्यामिति भावेनाह ॥ रज इति । ईश्वरेच्छया सत्त्वमुत्कटं सत् रजस्तमश्चाभिभूय स्वकार्यदक्षं भवति । रजस्तथोत्कटं सत् तमः सत्त्वं चाभिभूय स्वकार्यदक्षं

भवति ।तमश्चोत्कटं सत् रजः सत्त्वं चाभिभूय स्वकार्यकारि भवति इत्यर्थः ।अभिभवशब्दितकार्यशक्तिप्रतिबन्धोगुणानामेव । देवानां त्वौदासीन्यमेवेति ज्ञातव्यम् ॥१४.१०॥

सर्वद्वारेषु देहेऽस्मिन्प्रकाश उपजायते ।
ज्ञानं यदा तदा विद्याद्विवृद्धं सत्त्वमित्युत ॥१४.११॥

केन किङ्गेन सत्त्वादिवृद्धिर्ज्ञेयेत्यत आह ॥सर्वेत्यादित्रयेण । अस्मिन्देहे सर्वद्वारेषु क्षेत्रादिषु ज्ञानं शब्दादिज्ञानात्मकः प्रकाशः ।उत शब्दात्सुखादि चोपजायते यदा तदा सत्त्वं विवृद्धमिति विद्याज्जानीयात् ॥१४.११॥

लोभः प्रवृत्तिरारम्भः कर्मणामशमः स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ॥१४.१२॥

लोभो धनोदेरत्यागेच्छा ।प्रवृत्तिर्व्यर्थोद्योगः ।काम्यकर्मणामारंभः । अशमः चित्तस्यानुपरतिः ।अप्राप्ताभिलाषः स्पृहा ।एतानि विवृद्धे रजसि जायंते ।एतै रजोवृद्धिर्ज्ञेयेति भावः ॥१४.१२॥

अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ॥१४.१३॥

अप्रकाशः क्षेत्रादिषु शब्दादिज्ञानाभावः ।अप्रवृत्तिरनुद्यमः । प्रमादोऽनवधानम् ।मोह्रो विपर्ययः ।एतानि तमसि विवृद्धे जायंते । एतैर्लिङ्गैस्तमोविवृद्धिर्ज्ञेयेति भावः ॥१४.१३॥

यदा सत्त्वे प्रवृद्धे तु प्रळयं याति देहभृत् ।
तदोत्तमविदां लोकानमलान्प्रतिपद्यते ॥१४.१४॥

सत्त्वादिगुणवृद्ध्यवस्थायां मृतानां गतिभेदमाह ॥यदेति द्वयेन । यदा सत्त्वे विवृद्धे देहभृत्प्रलयं याति म्रियते तदोत्तमविदां विष्णुज्ञानिनां अमलान्निर्दोषान्लोकान्देहान्प्रतिपद्यते ।सात्त्विककुले जायत इत्यर्थः ॥१४.१४॥

रजसि प्रळयं गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१४.१५॥

रजसि प्रवृद्धे प्रलयं गत्वा मृत्वा कर्मसङ्गिषु काम्यकर्मिणां कुले जायते ।तथा तमसि प्रवृद्धे प्रलीनो मृतः मूढयोनिषु

दैत्यानां कुलेषु जायते ॥१४.१५॥

कर्मणः सुकृतस्याहुः सात्त्विकं निर्मलं फलम् ।
रजसस्तु फलं दुःखमज्ञानं तमसः फलम् ॥१४.१६॥

सात्त्विकादिकर्मणां फलमाह ॥ कर्मण इत्यादिद्वयेन । विद्वत्कुलप्रसूतेन सुष्ठुकृतस्यकर्मणः सात्त्विकं निर्मलं दुःखगन्धहीनं फलमाहुः । रजसो राजसकर्मणस्तु दुःखं दुःखमिश्रं सुखमाहुः । तमसस्तु तामसकर्मणः अज्ञानं अज्ञानकार्यं च फलमाहुः ॥१४.१६॥

सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१४.१७॥

निर्मलत्वादिफलं च किमित्यतो विविच्याह ॥ सत्त्वमित्यादिना । ज्ञानं परापरतत्त्वविषयम् । लोभः स्वर्गादिविषयासक्तिः । भवत एवेत्यन्वयः । अज्ञानं च भवतीत्यर्थः ॥१४.१७॥

ऊर्ध्वं गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसाः ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसाः ॥१४.१८॥

ज्ञानलोभप्रमादादेः सत्त्वादिगुणेभ्यः साक्षाज्जन्यत्वेऽपि तस्य स्वरूपतोऽफलत्वात्तज्जन्यफलान्याह ॥ ऊर्ध्वमिति । सत्त्वस्थाः सात्त्विकाः ज्ञानेनोर्ध्वं जन आदिलोकं गच्छंति । राजसाः काम्यकर्मिणः मध्ये स्वर्गादौ तिष्ठंति । जघन्यगुणस्तमः तद्वृत्तिस्तत्परिणामाज्ञानं तन्निष्ठास्तद्वतं इत्यर्थः । अधो निरयं गच्छंति ॥१४.१८॥

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टाऽनुपश्यति ।
गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ॥१४.१९॥

एवं त्रयोगुणा विविच्योक्ताः । तेषां जगद्बन्धकत्वं तेभ्यः साक्षात्परंपरया च जन्यफलानि चोक्तानि । एवं त्रैगुण्यस्य 'कार्यते ह्यवश' (३.५) इत्यत्र सङ्क्षेपेणोक्तस्येह विविच्य कीर्तने कृते सति तर्हि गुणा एव सर्वोत्तमाः न तु ततोऽन्यः सर्वोत्तमोऽस्तीति शङ्का स्यात्तां निराकरोति ॥ नान्यमिति । द्रष्टा जीवः यदा गुणेभ्योऽन्यं कर्तारं परिणामिकर्तारं नानुपश्यति । गुणेभ्यश्च परं स्वतंत्रं परमात्मानं वेत्ति स ज्ञानी मद्भावं ज्ञानानन्दात्मिकां मयि स्थितिं अधिगच्चति प्राप्नोति । यद्वा एतेभ्यो गुणेभ्योऽन्यं कर्तारं ईशं यदाऽनुपश्यति । तदा द्रष्टैव ना । नृशब्दोऽयं पुरुषः,

अन्यथा पशुः । न केवलं गुणेभ्योऽन्यत्वेन कर्तारं पश्यन्
ना पुरुषः किंतु गुणेभ्यः परमुत्तमं उत्तमत्वेनापि पश्यन्पुरुषः ।
कुतः स एवं पश्यन्यस्मान्मद्भावं अधिगच्चति अत इति ॥ १४.१९ ॥

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ॥ १४.२० ॥

एवं सुखदुःखादिरूपबन्धस्य गुणत्रयनिबन्धनत्वात्तदत्यये सत्येव
बन्धहानिर्नान्यथेत्याह ॥ गुणानिति । तत्तद्गुणपरिणामिदेहेषु
प्रकटीभूतान् त्रीन् गुणानतीत्यैव जन्मादिभिर्विमुक्तोऽमृतमश्नुते
परं ब्रह्म प्राप्नोति ॥ १४.२० ॥

अर्जुन उवाच

कैर्लिङ्गैस्त्रीन्गुणानेतानतीतो भवति प्रभो ।
किमाचारः कथं चैतांस्त्रीन्गुणानतिवर्तते ॥ १४.२१ ॥

गुणानतीत्येत्युक्ते सति पृच्छति ॥ कैरिति । एतान्सर्वबन्धकान्
सत्त्वादिगुणानतीतोऽतिक्रांतः पुमान्कैर्लिङ्गैर्लक्षणैर्युक्तो भवति ।
हे प्रभो किमाचारः कीदृशाचारवान् । कथं केनोपायेनैतान्
त्रीन् गुणानतिवर्तते ॥ १४.२१ ॥

श्रीभगवानुवाच

प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव ।
त द्वेष्टि संप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥ १४.२२ ॥

इति पृष्टो भगवानुत्तरमाह ॥ प्रकाशं चेत्यादिना । सत्त्वादयो
गुणा हि द्विविधाः, स्थूलाः सूक्ष्माश्च । स्थूलेभ्यो लौकिकाः
प्रकाशप्रवृत्तिमोहाः जायंते । सुक्ष्मेभ्यस्तु परमेश्वरादिविषयाः ।
तत्राद्येभ्यः, सत्त्वादिगुणेभ्यः क्रमाज्जातं प्रकाशं
प्रवृत्तिशब्दितमुद्योगं मोहशब्दितमज्ञानं चेत्येतानि
संप्रवृत्तानि प्रायो न द्वेष्टि । निवृत्तानि च न काङ्क्षति ।
गुणातीत इत्यनुषज्यते । द्वितीये तु विष्णुविषयप्रकाशं
प्रवृतिं चेच्छति मोहं च द्वेष्टीत्यर्थः । यद्वा पुरुषांतरे
स्थितप्रकाशादिसाधुगुणजातानि संप्रवृत्तानि न द्वेष्टि ।
मोहाद्यसाधुधर्मजातं निवृत्तं न काङ्क्षतीत्यर्थः ।

परस्येष्टानिष्टहानिप्राप्ती नेच्छति गुणातीत इति भावः ॥१४.२२॥

उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते ॥१४.२३॥

एवं कैर्लिङ्गैरिति प्रश्नस्योत्तरमुक्त्वा किमाचार इत्यस्योत्तरमाह ॥ उदासीनवदिति ।यो गुणातीतः पुमानुदासीनवदासीनः ।न तूदासीन एव, वैष्णवधर्मानुष्ठानात् ।गुणैः सत्त्वादिभिर्न विचाल्यते । तत्कृतविकारं न प्राप्नोति ।गुणाः सत्त्वादयः ।परमेश्वरेच्छया प्रवर्तते न स्वतंत्रा इत्येवं योऽवतिष्ठति वेत्ति ।स नेङ्गते गुणकृतावैष्णवकर्मकरणाय न चेष्टत इति ।वैष्णवान्येव कर्माण्याचरति नान्यानीति तदाचार इति भावः ॥१४.२३॥

समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ॥१४.२४॥

आचारांतरं चाह ॥समेति ।प्रायेण हेयतया दुःखसमं वैषयिकं सुखं यस्य स समदुःखसुखः ।गुणातीत इत्यनुषज्यते ।स्वस्थः प्रायेण निर्विकारः ।हेयत्वेन लोष्टाश्मसमं काञ्चनं यस्य स समलोष्टाश्मकाञ्चनः ।प्राय इति सर्वत्र योज्यम् । हेयत्वेनाप्रियतुल्यं प्रियं यस्य स तुल्यप्रियाप्रियः ।हेयत्वेन निन्दया तुल्या आत्मनः स्वस्य संस्तुतिर्यस्य स तथा ।समत्वादिकं केन स्यादित्यत उक्तं धीर इति ।धैर्येणेत्यर्थः ।यद्वा विष्णुभजनादिविषये समदुःखसुख इत्यादि योज्यम् ।किमुक्तं भवति ।विष्णुभजनादौ दुःखसत्त्वे तत्त्यागे सुखसत्त्वेऽपि विष्णुभजनादिकं सममेकप्रकारमेव कार्यमित्युक्तं भवति ।एवमग्रेऽपि ।अनुष्ठाने लोष्टाश्माद्यनभिमतप्राप्तिः तत्त्यागे काञ्चनाद्यभिमतं प्रयच्छतीति विष्णुभजनादिकं न त्याज्यम् ।लौकिकपुमर्थप्राप्तिहानावपि विष्णुभजनादि न त्याज्यमिर्यर्थः ।अनुष्ठानेऽननुष्ठाने प्रियाप्रिययोः प्राप्तावपि विष्णुभजनादौ तुल्य एव । सदाऽनुष्ठेयमेवेत्यर्थः ।तथाऽनुष्ठानाननुष्ठानयोः क्रमान्निन्दात्मस्तुल्योः प्राप्तौ सत्यामपि विष्णुभक्त्यादौ तुल्य एव न त्याज्यं विष्णुभक्त्यादीत्यर्थः ।तत्र हेतुर्धीरः । धीमान्विमाहात्म्यज्ञानवान्स्वस्थः विष्णुधर्मादचल इति ॥१४.२५॥

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः ।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ॥१४.२५॥

तथा मानापमानयोः प्राप्तावपि विष्णुभक्त्यादौ तुल्य एव ।न त्याज्यं

तदित्यर्थः । कृतावकृतौ चारिपक्षमित्रपक्षयोः सत्त्वेऽपि विष्णुभक्त्यादि कार्यमेवेत्यर्थः । पूर्वं 'नेङ्गत' इति सामान्यतोऽवैष्णवकर्मारंभत्यागोक्तावपि प्रयोजनविशेषापेक्षयाऽपि नावैष्णवकर्मारंभवानित्याह ॥ सर्वारंभपरित्यागीति । केनचित्प्रयोजनेनाप्यवैष्णवसर्वकर्मारंभमकुर्वन्नित्यर्थः । यद्वा 'नेङ्गत' इत्यल्पावैष्णवकर्मत्यागः, अत्र तु अतिदीर्घा वैष्णवकर्मत्याग इति न पुनरुक्तिः ॥ १४.२५ ॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥ १४.२६ ॥

एवं गुणातीतलक्षणं आचारं चोक्त्वा कथं 'गुणानतिवर्तत' इति प्रश्नस्योत्तरमाह ॥ मां चेति । अव्यभिचारेण भक्तियोगेन नित्यभक्त्याख्योपायेन मां च सेवते । गुणान्सत्त्वादिगुणैः तदभिमानिश्रीदेव्यादिभिः कृतबन्धं समतीत्य ब्रह्मभूयः । ब्रह्मशब्दोऽत्र चित्प्रकृतिपरः । चित्प्रकृतिवद्भूयं भवनं ब्रह्मभूयम् । सा यथा विष्णुप्रिया तथा गुणातीतोऽपि विष्णुप्रियो भवतीत्यर्थः । यद्वा ब्रह्मणि चित्प्रकृतौ भूयाय भावाय चित्प्रकृतिप्राप्तये कल्पते शक्तो भवति ॥ १४.२६ ॥

ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥ १४.२७ ॥

ननुगुणातीतस्य भगवत्प्राप्यादिकमेव वाच्यम् । लक्ष्मीप्राप्तिः किमर्थमुच्यते । इत्यतस्तत्प्राप्तौ मत्प्राप्तिरेव भवति । तस्याः मत्स्थत्वादिति भावेनाह ॥ ब्रह्मण इति । ब्रह्मणो महालक्ष्म्याः अव्ययस्यामृतस्य च मुक्तवर्गस्य शाश्वतस्याक्षयफलस्य निष्कामधर्मस्य एकांतिकस्य अस्मादिदमधिकमिति गणने एकमेवांते यस्य तदैकांतिकं तस्य दुःखासंभिन्नस्य सुखस्य मोक्षस्येत्यर्थः । प्रतिष्ठा आधारः । अतो मदवियोगिनीं लक्ष्मीं प्राप्तो मामेव प्राप्तो भवति । गुणातीतो लक्ष्मीसमीपं प्राप्य तदनुगृहीतो हरिं पश्चादाप्नोतीति । परंपराद्योतनायैवमुक्तिरिति ज्ञेयम् ॥ १४.२७ ॥

इति श्रीमद्गीतार्थसङ्ग्रहे श्रीराघवेन्द्रयतिकृते

चतुर्दशोऽध्यायः